# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - आचार्य-१ ( Sem_2 )** **प्रश्नपत्र-३** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC4.2.5 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 19/04/2016 **सन्दर्भग्रन्थः - श्रीमद्भागवतमहापुराणे एकादशस्कन्धः**

---

**युनिट-१**

**प्रश्न-१** **द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते व्याख्या कार्या ।** ०८

१. श्रुतोऽनुपठितो ध्यात आहतो वाऽनुमोदितः । सद्यः पुनाति सद्धर्मो देव विश्वद्रुहोऽपि ॥

२. दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः । तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥

३. सर्वभूतेषु यः पश्येद् भगवद्भावत्मनः । भूतानि भगवत्यात्मन्येव भागवतोत्तमः ॥

**प्रश्न-२** **भगवतः अवताराणां विवेचनं ग्रन्थोक्तदिशा कुरुत ।** ०८

**अथवा**

**अवधूतोपाख्यानं सविस्तरं लिखत ।**

**प्रश्न-३** **टिप्पणीद्वयं लिखत ।** ०४

१. कर्मयोगनिरूपणम् ।

२. भगवतः पूजाविधिः ।

३. भगवतः सान्निध्ये समुपस्थितोद्धवः ।

४. यदुवंशाय ऋषिशापः ।

**युनिट-२**

**प्रश्न-४** **द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते व्याख्या कार्या ।** ०६

१. आत्मनो गुरुरात्मेवे पुरुषश्च विशेषतः । यत् प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥

२. नातिस्नेहः प्रसङ्गो वा कर्तव्यः क्वापि केनचित् । कुर्वन् विन्देत सन्तापं कपोत इव दीनधीः ॥

३. यथोर्णनाभिहृदयादूर्णां सन्तत्य वक्त्रतः । तया विहृत्य भूयास्तां ग्रसत्येव महेश्वरः ॥

**प्रश्न-५** **बद्धमुक्तभक्तानां लक्षणानि ।** ०५

**अथवा**

**भक्तियोगस्य ध्यानयोगस्य महिमा ।**

**प्रश्न-६** **टिप्पणीद्वयं लिखत ।** ०४

१. लौकिकपारलौकिकभोगाः ।

२. सत्सङ्गस्य महिमा ।

३. हंसोपदेशः ।

४. सिद्धीनां वर्णनम् ।

## युनिट-३

**प्रश्न-७ द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या । ०६**

१. शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् । मद्भक्तश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥

२. पुत्रदाराप्तबन्धूनां सङ्गमः पान्थसङ्गमः । अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ॥

३. बुधो बालवत् क्रीडेत् कुशलो जडवच्चरेत् । वदेदुन्मत्तवद् विद्वान् गोचर्यां नैगमश्चरेत् ॥

**प्रश्न-८ वर्णाश्रमधर्माणां निरूपणं कृत्वा संन्यस्तधर्मान् वर्णयत । ०५**

**अथवा**

**ज्ञानभक्तिकर्मणां यमनियमानां च वर्णनं कुरुत ।**

**प्रश्न-९ टिप्पणीद्वयं लिखत । ०४**

१. विभूतियोगः ।

२. गुण-दोषवर्णनम् ।

३. पुरुष-प्रकृतिविवेकः ।

४. तितिक्षुब्राह्मणस्येतिहासः ।

## युनिट-४

**प्रश्न-१० द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या । ०८**

१. भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥

२. स्तेयं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः । भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥

३. अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहम् । धर्मो चित्तं नृणां प्रेत्य सन्तोऽर्वाग् बिभ्यतोऽरणम् ॥

**प्रश्न-११ साङ्ख्यभोगं ग्रन्थोक्तदिशा वर्णयत । ०८**

**अथवा**

**भगवतः स्वधामगमनं वर्णयत ।**

**प्रश्न-१२ चतुर्णां लघूत्तरं लिखत । ०४**

१. एकादशस्कन्धस्य नाम किम्?

२. स्कन्धेऽस्मिन् कति अध्यायाः?

३. दत्तात्रेयस्य गुरवः कति?

४. भगवतः कृष्णस्य वंशः कः?

५. भागवते कति स्कन्धाः?

६. भगवतः श्रीकृष्णस्य वंशः कः?

७. अन्तिमोपदेशं भगवान् कस्मै प्रयच्छति?